तर्कीय तत्कर गीती

1

ग्रहमिष्टं रविगुणितं
पुनर्ग्रहघ्नं मध्य भागआयुः
परमदिनं दिनमांतरं क्षेपट मानांगु
लसकुभांतरगजभुक्रमनेन भाजि
तं दिनमध्यादि घासमध्ये(ष्ट)नाडिका।

त॰ टी
१

श्रीमतेरामानुजायनमः श्रीवकुलाभरणायनमः लंबोदरपदद्वंद्वं चिंतनात्सममनोरथं अनंतभट्टंमीमांसापारगंतारमाश्रये १ शारली
कृत्यविश्वेशचरणौतन्यतेतराम् बालानामवगाहायतर्कामृततरंगिणी २ विघ्नविघातायकृतंमंगलंशिष्यशिक्षार्थंनिबध्नन्
चिकीर्षितंप्रतिजानीते ग्रस्याद्याइति तच्छ्रीविश्वेश्वरणांबुजेमित्यन्वयः त्रिदशानांसंदोहाः समूहाः त्रिदशश्रेष्ठाइतिवा सदा
निखिलैःअर्चितासंतोऽभिष्टदाः तत्किंयत्रेत्यन्वयः समस्तावस्तुयस्यस्पर्शोऽनुभित्याद्याः मनसोऽतःकरणस्यवृत्तीः चरणांबुजे इत्यत्र।
हत्यम्बइत्यत्रच उत्तरपदार्थप्रधानोनमयूरव्यंसकादिसमासः अपितु पूर्वपदार्थप्रधानःउपमितसमासः तेनाज्ञानताशकत्व
समपद्येऽप्रसिद्धत्वेपिननक्षतिः। पद्मपत्रयोनिधानेनामृतविस्तारानुगुणत्वं तर्कामृततर्कं मूलमिव अर्थपदार्थनिरूपणसंक्षेपतः क्रियते
इत्याध्याहत्यान्वकिंमितिपदार्थनिरूपणमित्याकांक्षायां श्रुतिरित्यादितदर्थमित्यंत आत्मावाअरेद्रष्टव्यइति इदंचबृहदारण्य।
केचतुर्थाध्यायेयामैत्रेयींस्त्रियंप्रतियाज्ञवल्क्यवाक्यम् आत्माआत्मैवत्यर्थः अरेनिचसंबोधने द्रष्टव्यइत्यादयोविधोनव्याः तदर्थे
श्रेयस्साधनंत्वमित्यभिप्रेत्याह मुमुक्षोरिति तथेष्टप्रकारेणानुष्ठितेष्वेति सूचयितुं मुमुक्षोरित्युक्तं एवंचास्यैवात्राधिकारःइत्यपिक
टाक्षितं भावनायाअंशत्रयनियतत्वादात्मदर्शनभावनाया आत्मदर्शनस्यकरणत्वेन मुक्तेःकर्मत्वेनावगमेपि इतिकर्तव्यतानवगमा

राम
१

त॰ा॰टी॰
२

वासिद्धम् संखंडोपाधयः ते च लन्तिरूपणोवर्त्स्यंते जातीनां वहुत्वात्तदुपादाने गौरवं मित्युपाधिरेव विशेषो पादायनदन्यत्वेनज्ञा
तिरह अन्यानीति तत्रेत्यादिस्पष्टम् आत्मन इति सुखादिसमवायिकारणतावच्छेदक द्रव्यलौकिकमानसजन्यकतावच्छेदक
तयावासिद्धस्यात्मत्वस्येश्वरे सत्वमिति द्योतयितुं केवलात्मन इत्युक्तं परं तु जीवात्मव्यवहारस्येश्वरेपि तुल्यत्वात् तस्येश्वरसंवध
इत्यभिप्रेत्याह अन्यानिजातय इति पूर्वग्रंथे जीवात्मापरमात्मा चेत्युत्तरग्रंथः संगमनीयः सावयवा अवयवसमवेताः विभुरूपा इति का
लिकदैशिकपरत्वापरत्वयोः सर्वत्र मूर्त्तेउत्पत्त्यनुरोधेन कालदिशोः सर्वत्र शब्दोत्पत्त्या काशस्याऽमूर्त्तत्वेन क्रियासंभवेन सर्वत्रज्ञान
दुत्पत्त्यात्मनश्च विभुत्वमावश्यकम् मनोऽणुरूपमिति विभुत्वे क्रियानुत्पत्त्या मनःसंयोगासंभवेन घटादिवन्मध्यमपरिमाणे वाच्यमूर्त्त
2 त्वे सति युगपच्चक्षुर्घ्राणादिसंयोगोत्पत्त्या युगपदेव चाक्षुषघ्राणजादिज्ञानोत्पत्त्यापत्तेरणुरूपत्वं वाच्यम् मानुषाणां मानुषादीनां
पार्थिवं पृथिवीसमवायिकारणकम् स्नेहसांसिद्धिकद्रवत्वशीतस्पर्शासमस्पर्शाभावात् अस्मदादीनां चाक्षुषत्वाच्च न जलादीनां परं तु
जलतेजोवायुपरमाणूनामुपष्टंभकत्वसंयोगादेवोपभोगसमर्थत्वं एवमेव जलादिशरीराणां शीतोष्णस्पर्शवत्त्वद्रवत्वादिभिस्तद्रू राम॰
पत्वं ननु जलादिशरीरं नोपलभ्यत इत्यत आह जलीयेति तथा च दूरत्वान्नोपलभ्यते नत्सत्त्वे प्रमाणमागमादिजलत्वे शरीरे ष्टलिसा २

तदाकांक्षायांसांन्निध्याच्छ्रवणादेरेवेतिकर्तव्यतात्वमित्यभिप्रेत्याह आत्मदर्शनोपाय: कइत्यपेक्षायामाहेति इति एवमाकांक्षायामाह
उपायमाह श्रवणादेर्गुरुकुलवासादेरितिकर्तव्यतात्वं स्पष्टमेव तेनपरस्पराकांक्षादिवसेन आर्थ: आर्थो यस्तु स्वभावाद्यायात्तकार्यस्य कारणो
त्तरभावित्वात् शाब्दश्चात्त: पाठतो लभ्य: नन्विदंश्रुतौ दृष्टमित्यत आह अग्निहोत्रमिति होमस्य द्रव्याकांक्षायां यवागूपाकस्य प्रयोजक
ताकांक्षायां सम्भवति दृष्टस्यान्याय्यत्वात् यवागूपाकस्याग्निहोत्रार्थत्वावगतिवदित्यर्थ: एवंचश्रोतव्य इत्यादौ विधिप्रत्ययेनेष्टसाधनत्वे
बोधितेष्यमाने उपस्थितात्मज्ञानमेवाष्टत्वेनावगम्यत इत्याह तथाचेति अत्र चोपके श्रुतित: कृतात्मश्रवणस्य पुंस: श्रोतव्यश्रुतिवाक्येभ्य इति
स्मरणात् कृतात्मश्रवणानंतरं मननबोधनादुत्क्रममधिकार: इतिप्रतीयत इतिशेष: भेदप्रतियोगितदज्ञानसंध्येति अभावज्ञाने प्रतियोगि
ज्ञानस्य हेतुत्वादिति भाव: सामान्यत: पदार्थत्वेन द्विविध: पदार्थत्वावांतरविभाजकोपाधित्वयविशिष्ट उपाधिद्वयमाह भावोऽभावश्चेति ए
वं षड्विध इत्यादावपि हि समवायभेदादितिद्रव्यादिसमवायांतांनां भेदो वैलक्षण्यं द्रव्यत्वादिवत्स्वरूपं तस्मादित्यर्थ: नन्वेतेषु षट्सुजातय
इति द्रव्यत्वं संयोगविभागसमवायिकारणतावच्छेदकतया गुणत्वं गुणपदशक्यतावच्छेदकतया कार्यतावच्छेदकतया वा जन्यगुणत्वा
वच्छिन्नं प्रति द्रव्यत्वेन कारणत्वात् कर्मत्वं चलतीत्यनुगतप्रत्ययसिद्धं विजातीयसंयोगविभागसमवायिकारणतावच्छेदकतया

त॰टी॰ पित्लौकिकविषयताश्रय इत्यर्थः। बहिरिंद्रियेति बहिरिंद्रियग्राह्यमात्मभिन्नत्वं महत्वे सतीति महत्वं परमाणुद्व्यणुकवारणाय उद्भूतत्वं घ्राणादि
२ वारणाय रूपवत्वं वायुवारणाय कालं यत्तावच्छेदकसंबंधो लौकिकविषयताकारणतावच्छेदकः समवायः अनन्यथासिद्धेति स्वतंत्रान्वय
व्यतिरेकशालिपदघटितरूपेण यस्य यत्कार्यं प्रति नियतपूर्ववृत्तित्वं तत्तत्कार्यं प्रति तेन तस्यानन्यथासिद्धत्वमेवं यथा स्वतंत्रान्वयव्यतिरेकवत्तादं
डेन कुलालेन च घटितदंडरूपत्वं कुलालपितृत्वं चेति तेन रूपेण तेषां तत्कार्ये दंडादिनान्यथासिद्धत्वं कपालघटितरूपेण कपालरू
पस्य चक्षुर्घटितेन चक्षुःसंयोगादिनान्यथासिद्धिवारणाय स्वतंत्रान्वयव्यतिरेकशालीति यत्पदार्थविशेषणं। तदर्थश्च यस्यान्यथासि
द्धत्वाभिमतं तत्र स्वाधारकान्वयादिमत्वं कपालचक्षुरोरेस्तु रूपसंयोगघटितत्वेनान्वयव्यतिरेकाविति तदमुदासः अत एव वर्तित्वघ
३ टितरूपेण यस्य यत्कार्यं प्रति नियतपूर्ववृत्तित्वं गृह्यते तत्कार्ये तद्रूपेण तदन्यथासिद्धम् एवं द्वितीयं यथा घटादौ शब्दसमवायिकारण
त्वेन गगनं अवश्यक्लृप्तसमिल्लिखने तद्रूपेण घटप्रतीत्यादि तृतीयं तेन कपालास्य द्रव्यत्वादिना च रूपादेः शब्दाश्रयत्वादिनाकाशादे
रन्यथासिद्धिः अवश्यक्लृप्तत्वं च लाघवादिना तच्चानेकविधं द्रव्यत्वादिना तत्त्वेनैकेषु कारणत्वकल्पनागौरवं एवं चात्र षड् संबंधः
नेकद्वयपदार्थघटितत्वेनान्यथासिद्धत्वमहत्वे तदभाव। एवं गंधप्रागभावः गंधरूपप्रतियोगिमण्डपस्थितत्वाद्रसप्रागभावो राम॰
ऽन्यथासिद्धः इत्यादि बहुतरं स्वयमूह्यं घटत्वावच्छिन्नेन दंडत्वादिना संयोगत्वाद्यवच्छिन्नं प्रति घटत्वादिनाकारणत्ववारणाय ३

वयववृत्तित्वे सति द्रव्यविभाजकोपाधित्वात् पृथिवीत्ववदित्यनुमानेच पार्थिवमिति गंधमात्रस्य ग्राहकत्वात् वायूपनीतसंपकभा
गवदिति शेषः गंधेतरगुणाग्राहकत्वे सति गंधग्राहकत्वमिति निष्कर्षः गुणपदेन गंधत्वरगंधत्वादिग्राहकत्वेपि न स्वरूपासिद्धिः संस्य
तेन भृंगधग्राहकजले न व्यभिचारः नस्यं गंधेतररसीयरूपग्राहकत्वात् विशेष्यदले तपसा एवादौ न व्यभिचारः द्रव्यत्वेन सन्निक
र्षेण व्यभिचारः जलीयमिति गंधाग्राहकत्वे सति रसग्राहकत्वात् लालादिवदिति शेषः सत्यंते न सशर्करादौ न व्यभिचारः शेषं पूर्ववत् तेजः
समिति स्पर्शाव्यंजकत्वे सति रूपव्यंजकत्वात् प्रभावदिति जलेऽञ्जइये व्यभिचारवारणाय सत्यंतं असरेऽत्रौ व्यभिचारवारणाय विशेष्यपरस्यो
येति वायवीयमिति इत्यन्ते सति स्पर्शग्राहकत्वादिति शेषः अंगसंगीपो व्यंजकव्यजनवातवत् श्रोत्रेंद्रियमिति तद्गुणग्राहकें
द्रियस्यतद्गतनियमात् शब्दवत्वे तस्याकाशत्वे नचाकाशस्यैककर्णशष्कुल्यवच्छिन्नस्य श्रोत्रत्वे तदवच्छेदेन धूश्यहोस्सं
नुभवसिद्धत्वात् बहिरिंद्रियाणीति आत्मानमभूहत्तिजातिवृत्त्यादिषद्गत्मान्नवृत्तिभिन्नपदार्थलौकिकभिन्नप्रत्यक्षज
नकानि अंतरिंद्रियमिपूर्वोक्तभेदप्रतियोगिनां लौकिकप्रत्यक्षजनकम् प्रतिशरीरमिति तच्छरीरावच्छेदेन सुखदुःखो
पभोगिनः वधर्मोद्वयोः पुलिवंधोः विघ्यामो तस्मात्माणः जीवानांमुभेदेएककालावच्छेदेनैकत्रप्रतियोगितन्नाशयोरसंभा
वादतएवेश्वरादपिभेदः इति प्रकाशः लौकिकप्रत्यक्षाविषयाणि आत्मा च प्रत्यक्ष इति मानसप्रत्यक्षसिद्धिरू। ०

त.त. धः एवं संयोगस्य विभागासम वायिकारणत्वस्य वारणीयत्वेहेतुतद्भिन्नत्वं न च तथापि वेगस्पर्शयोरभिघातासमवायी
४ कारणत्वस्य वर्ववेदवारणीयं एतदुभयभिन्नमिति नवरं डोदः रूपादिसमवायिकारणत्वात् कपालचक्रसंयोगस्य घ
टचक्रसंयोगासमवायिकारणत्वात्तद्भिन्नत्वाभावेन घटं प्रति निमित्तकारणतानापत्तिरिति वाच्यं तदुभयकारणता
भिन्नकारणत्वेन निमित्तकारणतापदेन विवक्षितत्वात् भावकार्यमात्रस्येति भावकार्यस्यैवेत्यर्थः तेन ध्वंसव्युदासः सर्व
4 त्रे भावकार्ये समवायिकारणनियमेन स्फूर्तिः भावकार्यभिन्नस्य त्रितयनियमव्यवच्छेदे तात्पर्यात् सर्वत्र भावकार्यमा
त्रे द्रव्यगुणइति अवयवसंयोगइत्यर्थः गुणेगुणः यथा कारणादिगुणेन कार्यादिगुणः कर्मचेति यथासंयोग
विभागादौ क्रिया चेकारेणकर्मणीगुणः कर्मचेति समुच्चीयेते ईश्वरइति नित्यत्वविशिष्टविषयतासंबंधेन कार्यमात्रे
सेवत्वसंबंधेनेश्वरः कारणं ज्ञानेच्छाकृतीनां विषयतासंबंधेन कार्यमात्रेतादात्म्येन अतएव त्रयाणां समासेन निर्देशः यद्वा स
मवाये दैशिकविशेषणतान्यतरसंबंधेन कार्यमात्रे स्ववृत्तिज्ञानविषयत्वसंबंधेनेश्वरः विषयतासंबंधेन ज्ञानेच्छाकृतीनां प्रा
गभावो विशेषणतया कालादिशस्तु कालिकविशेषणतया दैशिकविशेषणतया कार्यमात्रे तादात्म्येन अदृष्टस्य तु कालि एम.
कविशेषणकार्यकारणभावघटकः संबंधइति ध्येयं संयुक्त द्व्यणुक अयादिति न च परमाणुद्वयसंयोगाद्व्यणुकमिवद्व्य ४

यनियतपूर्ववर्तीति तथाचान्यथासिद्धिघटकीभूततत्तद्धर्मभिन्नतत्कार्यतावच्छेदकावच्छिन्ननियतपूर्ववर्तितावच्छेदकधर्मव
त्वंतत्कारणतेतिपर्यवसितं नियतपूर्ववर्तितावच्छेदकत्वं च तत्कार्यतावच्छेदकसंबंधेन तत्कार्यतावच्छेदकावच्छिन्नाधिकरणे
तत्कार्यतानव्यवहितपूर्वकालावच्छेदेन तत्कारणतावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणो दैशिकविशेषणतया वर्तमानो योऽभावः तत्प्रतियोगि
तानवच्छेदकत्वं एवं च स्मृत्यव्यवहितपूर्वत्वेन स्मृत्यधिकरणे ज्ञानाभावसत्वेपि संस्कारसंबंधेन प्रतियोगिसामानाधिकरण्यात् तत्कारणादौ ज्ञानादेः
कारणत्वक्षतिः कार्यकालवर्तितया कारणतास्थले तु कार्यकालीनत्वपूर्वकालीनत्वेतिवाच्यमिति संक्षेपः समवायिकारणे संबद्धमिति समवायस्वस
मवायिसमवायान्यतरसंबंधेन संबद्धमित्यर्थः क्रमेणोदाहरणद्वयमाह यथेत्यादिना कपालद्वयसंयोगस्य घटसमवायिकारणे कपालेसमवा
येनसत्वात् कपालरूपस्य घटसमवायिकारणे घटे स्वसमवायिसमवेतत्वसंबंधेन सत्वाच्च न च कपालचक्रसंयोगस्य घटं प्र
त्यसमवायिकारणतापत्तिः संबद्धमिति कारणमात्रसंबद्धत्वाभिधानेन च आत्ममनःसंयोगादेर् ज्ञानाद्यसमवायिकारणत्वापत्तेः न
चेष्टापत्तिः तन्नाशे घटनाशापत्तेरसमवायिकारणहेतुत्वात् स्वनाशस्य द्र[illegible]हेतुत्वात् इतिवाच्यं घटासमवायिकारणत्व
त्वे तद्भिन्नत्वस्य तत्समवायिकारणमात्रसंबद्धत्वस्य वा निवेश्यत्वात् कपालचक्रसंयोगस्य घटचक्रसंयोगासमवायिकारण
सामान्यलक्षणेस्य तु संग्राह्यमेव आत्मगुणानां कार्यासमवायिकारणविरहात् तद्भिन्नत्वं सामान्यलक्षणे तु वक्तव्यम् इष्टापत्तौ त्वाकरविरो

हे

त॰ त॰ द्वित्रयाद्यवृत्तित्वस्य अल्पं तु साक्षी तस्पर्शे प्रत्यक्षसिद्धत्वात् अन्येषां निःस्पर्शत्वादित्यर्थः तदनुमानं कालेप्रमाणं भूपरत्वेप्रमाणभूतं
५ परत्वेत्यादीदमंतपक्षनिर्देशः रविविशेष्यकरविक्रियादिवैशिष्ट्यज्ञाने साक्षात्संबंधाभावघटितहेतोः स्वरूपासिद्धिर्वाधश्चेत्य
परत्वजनकमिति तथाच शरीरविशेष्यकं दिशादिरूपक्रियाविशिष्टज्ञानं पक्ष इदमुभयमपीदं पदार्थपरिचायकं नातस्तद्वैय
र्थ्यं विशिष्टज्ञानमात्रे गोरित्याविशिष्टज्ञाने व्यभिचारीति साक्षात्संबंधाभावसत्तोति अखंडपदार्थनिष्ठसांसर्गिकविषयतानि
रूपकत्वं तदर्थः तावन्मात्रे च निर्विकल्पके व्यभिचारीति विशेष्यं स्वसमवायिसंयुक्तेति स्वं रविक्रिया तत्समवायि रविः तत्संयुक्ते
5 त्वेन कालः सिद्ध्यति अवधिलापेसेतियाथा प्रयागात्काशीतो गयापरागयानः काश्यपरोति अत्राद्ये अवधिः काशी तदपे
क्षया प्रयागावधिकबहुतरसंयोगवत्वं गयायां छिन्नीयेवधिर्गयातदपेक्षया प्रयागावधिकाल्पसंयोगास्तद्वत्वं न साक्षात् किंतु
तावत्समवायिसंयुक्तत्वरूपपरंपरयेति तावत्समवायि दिक्सिद्धिः नच प्रयागसमीपवर्तिन्यपि ताहृशसंयावत्संयोगा अयदि।
कसंयुक्तपरत्वापत्ति प्रयावधिकायकाश्यपेक्षया बहुतराः संयोगास्तेदंतःपातितद्देशप्रतियोगिकसंयोगस्य तस्मिन्साक्षात्परंप राम॰
स्यावानंगीकारात् उभयत्राशंकते नचेति आकाशमिपक्षत्वेणे आत्मारविक्रियाविशिष्टबुद्धौ अवधित्वापेक्षत्वाबलसं ५

एणुकद्वयसंयोगत्रसरेणुरुत्पद्यतामितिवाच्यं तथासतित्रसरेणोरुत्कृष्टत्वानुत्पत्त्यापत्तेः कारणगतमहत्त्वाभावात् नचतथापिसंयुक्त
परमाणुत्रयादेव त्रसरेणुरुत्पद्यतामितिवाच्यं तत्रसावयवद्रव्यारब्धत्वस्यैवसाध्यत्वात् आत्मावयवीति अंत्यः द्रव्यानारंभकः
प्रत्यक्षद्रव्येइति महदुद्भूतरूपवत्वद्रव्ये अतींद्रियेतादृशरूपप्रत्यक्षे तत्र अनुमानं व्याप्तिज्ञानं ननुव्यतिरेकिणिपक्षस्तास्सा
साध्यज्ञानाभावेपि व्याप्तिग्रहाद्विनासहचारज्ञानंव्याप्ति प्रत्यक्षानुत्पादाच्च आहविशेषइति तथाचन्वयिनितद्रूपेक्षणीयमि
त्यादिवक्ष्यतेऽनुमानखंडे सावयवेति यद्यपि अत्रसावयवारब्धत्वे द्रव्यारब्धत्वमात्रं वाव्यभिचारी तथापिव्यापकेव्यर्थविशेषणता
विरहान्नदोषः वहिरिंद्रियवेद्यद्रव्यत्वादिति मनोवेद्यात्मनिव्यभिचारवारणाय वहिःपदं रूपत्वादौव्यभिचारवारणाय द्रव्यप
दं नचतथापि वहिरिंद्रियजन्योपनीतभावविषयेगगनादौव्यभिचारइतिवाच्यं वहिरिंद्रियजन्यप्रत्यक्षीयलौकिकविषयतासमा
नाधिकरणद्रव्यत्वास्यविवक्षितत्वात् अनेनानुमानेनसिध्यतिसिद्धिरनुमितिः तदिधयः इत्यर्थः शब्दे न शब्दपरक्षकानुमानेनस्प
र्शेनस्पर्शपरक्षकानुमानेनन द्रव्यान्तरवाधादिति शब्दोनस्पर्शवदाश्रितः स्वाश्रयनाशाजन्यनाशप्रतियोगिभिन्नयत्ताङ्गिन्नगुणत्वे
तज्ज्ञानवत् नात्माश्रितःश्रोत्रग्राह्यत्वात् शब्दत्ववत् नदिक्कालमनोश्राश्रितः विशेषगुणत्वात् रूपवदित्यर्थः पृथिव्या

त:न:
६
इंद्रियांतरवाधेति इंद्रियांतरजन्यत्ववाधेसत्वाशीचक्षुराद्ययोग्यत्वादितिभावः उभयतःसमवायिकारणनाशादसमवायिकारणनाशा
च्च द्व्यणुकनाशस्तुनोभयतः तत्समवायिकारणनाशस्यपरमाणोर्नित्यत्वादितिभावः समवायश्चेति अत्रातीति वचनविपरिणामेनान्वाय
यः भूतत्वं वहिरिंद्रियग्राह्यविशेषगुणत्वं मूर्तत्वंक्रियासमवायिकारणतावच्छेदकतयासिद्धोजातिविशेषःतत्ररूपत्वादीनिस
र्वाण्यपिवजातयःइति नचानुगतप्रतीत्याशक्यतावच्छेदकतयावाजातिसिद्धौ अदृष्टपदशक्यतावच्छेदकतयापितत्सिद्धौच
तुर्विंशतित्वानुपपत्ति यत्यसाधेनरूपावोधोनुभवसिद्धस्तदवच्छिन्नेतत्पदशक्त्युपगमात् हर्यादिपदादिवाहस्तपदादपिधर्मत्वा
6
धर्मत्वाभ्यामेवबोधात् संस्कारपदात्संस्कारप्रकारकबोधस्यानुभवसिद्धत्वात्तत्सिद्धिःउक्तंच संस्कारमिश्रैःउत्पादसजातीयोत्पा
दकंत्वंत्रयाणामनुगतंरूपं संस्कारत्वजात्यभिव्यंजकमिति विभुपदादपि सर्वमूर्तत्वसंयोगित्वरूपव्यापकत्वप्रकारकबोधसे
वानुभवसिद्धत्वात्तद्विभुत्वसिद्धिरिति प्राचीनपथ्यपुरिस्कारकोविदएवविदांकुर्वंतुचोत्रादीत्यादिनानीलकपिशयोःसंग्रहः
अतींद्रियवृत्तिसामान्यगुणाइतिसमान्येत्यनेनवाय्वाकाशावृत्तिविशेषगुणशब्दस्पर्शयोः अत्यसत्वेपिनतत्ति:महद्वृत्तिसती
त्यनेनपरमाणुवृत्तिरूपादीनांउद्भूतत्वेन घ्राणादिरूपादीनांवारणं स्ववृत्तिविशिष्टज्ञानत्वमित्यनेननिर्विकल्पकस्यनप्रसक्तं अंतार्वंश्ि राम:
ति तयोरतींद्रियत्वादिति अन्यवृत्तिविशेषगुणाःरूपरसगंधस्पर्शस्नेहसांसिद्धिकद्रवत्वानिस्वसमानजातीयाःस्ववृत्तिरूपत्वव्याप्य ६

योगसमवायिसंयोगविशिष्टबुद्धौदिक् अवधिसापेक्षताहशसंयोगविशिष्टबुद्धौकालइत्यपिबोध्यम् धर्मिग्राहकप्रमाणसिद्धत्वा
दिति धर्मिण आकाशस्यग्राहिकायाप्रमाणपूर्वोक्ताशब्दपक्षानुमितिः शब्दाश्रयत्वेतुल्यत्वात्नित्यविभुत्वतथातद्विषयत्वादित्यर्थः तेषं
संबंधघटकत्वेनहिमवत्यपिविंध्यवत्त्वप्रतीत्यापत्तिकालदिशोस्तु यत्संबंधघटकत्वेनसिद्धिः तद्विशिष्टबुद्धिनियामकत्वेनातिप्रसं
गात् रविक्रियोपनायकत्वं रविक्रियोन्नीतभाननियामकत्वं द्वित्तिः घ्राणत्वमित्यर्थः तेनद्वित्वत्वसामानाधिकरण्येनसकर्तृकत्व
साधनेनसिद्धसाधनं अवच्छेदकावच्छेदेनतत्साधनेबाधः घटादीनांकुविंदादिकर्तृकत्वसिद्धेः निरुपपक्षत्वादोसकर्तृकत्वाभावा
दिप्रसक्तं पक्षा समवायकालिकविशेषणतोभयसंबंधेनद्वित्वपक्षतावच्छेदकत्वान्नित्यसाधारण्यं पक्षतावच्छेदकावच्छेदेनसा
ध्यसिद्धेरुद्देश्यत्वाच्चनांशतः सिद्धसाधनदोषः इतिसकर्तृकत्वंचोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वं कार्यत्वं प्रागभा
वप्रतियोगित्वेसति ध्वंसप्रतियोगित्वं तेनध्वंसेनव्यभिचारः तेनेश्वरस्यापि नाहशज्ञानचिकीर्षाकृतिमत्त्वमस्मदादिषुसंभवात् उपा
दानपरमाण्वादेरतीन्द्रियत्वात् योगिनामपिपरमाणोरपरोक्षज्ञानासंभवात् सर्गाद्यकालीनद्व्यणुकादौतदसंभवात्च नाहशा
ज्ञानचिकीर्षाकृतिमानीश्वरः सिद्ध्यति लाघवाच्चताहशज्ञानचिकीर्षाकृतीनांनित्यत्वं तस्यैकत्वं तत्सार्वज्ञस्य ईश्वरसार्वज्ञस्य
विनिगमनाविरहेणनियामकाभावेनेश्वरज्ञानादेःसर्वविषयकत्वसिद्धिरितिभावः प्रत्यक्षत्वमीश्वरप्रत्यक्षेव्यभिचारीतिजन्येति ई

प०त० चयपदार्थविवर्णं प्रशिथिलत्वं च किंचिद्वयवानच्छिन्नत्वम् अन्योन्याभावप्रतीतिरित्यादि ननु घटस्य भेदः पटाद्भेद इत्या
७ दिप्रत्यासत्त्यायं नियमः इति वाच्यम् तत्रापि भेदस्य पृथक्करूपत्वात् यथा चैतत्तथा प्रपंचितमस्माभिस्तत्त्वचिंतामणिटिप्पण्यां परंत्वन्यो
न्याभावपदस्य पृथक्कवाचित्वस्य केनाप्यनंगुमतत्वात् घटस्यान्योन्याभाव इत्यादौ प्रतियोग्यनुयोगिनोः समानविभक्तिकत्वस्य व्यभिचारः
तथापि प्रतियोगिनिष्ठप्रकारतानिरूपितप्रतियोगित्वत्वावच्छिन्नविषयतानिरूपितान्योन्याभावप्रत्यय इत्यर्थः पंचमीतृतीययोः प्रतियो
गित्वेनैवशक्तेः षष्ठ्यास्तु संबंधत्वेनैव लक्षणेनैव बोध मनः कर्मणीति आत्मनो मूर्तत्वेन क्रियाविरहादिति भावः द्रव्यनाशसहकृतस्यैव
7 ति निरपेक्षस्य तत्त्वे विभागस्य कर्मत्वापत्तेः संयोगविभागयोरनपेक्षं कारणं कर्मेति सूत्रात् एवकारेणे संयोगनाशसहकृतस्य वि
भागजनकत्वमिति कंदलीकारमतव्यवच्छेदः तथाहि कर्मणापि उत्तरसंयोगजनने पूर्वसंयोगनाशापेक्षणात् पूर्वसंयोगनाशा
तिरिक्तस्यानपेक्षणे विभागस्यापि कर्मत्वापत्तेस्तदवस्थत्वादिति पदीति कर्मेत्यर्थः तथा च कर्मत्वघटितैव व्याप्तिरन्यथाऽ रामं
व्यभिचारापत्तेः व्याप्तेरिति विकसत्कुड्मलैर्भंग एव विपक्षबाधकस्तर्कः इदं च वैशेषिकमतं नैयायिकनये तु कर्मणो ८
वैलक्षण्ये न हस्तकर्मणो तथात्वेपि कपालकर्मणस्तथात्वे वा धकाभावात् कारणमात्रविभागजविभागास्वीकारः कपालकर्म

जातिमत्त्वं कारणगुणप्रक्रमजन्याः परमाणुपाके सति पक्वपरमाणुभिर्द्व्यणुकादौ क्रमेण घटोत्पत्तौ न्यायनैयायिकारम्भप्रक्रमेणपा
कजरूपोत्पत्ति वैशेषिकमतेतु परमाणौ अग्निसंयोगजाः अवयविनि पाकप्रयोज्या एव अन्नायं विवेकः घटस्य सच्छिद्रत्वात्तदन्तः
प्रविशेन परमाणुमारभ्यावयविपर्यन्तं युगपदेवपाकेन पूर्वरूपनाशोरूपान्तरोत्पादश्चेतिनैयायिकमतं अग्निसंयोगेनतोदनात्वेनप
रमाणुक्रियाविभागादिक्रमेणरूपोत्पत्तिरितिवैशेषिकमतं चित्ररूपमितिदेशिकाव्याप्यवृत्तिविरुद्धा नीलपीतकपालारब्धघटेनी
लपीतरूपयोरसम्भवात् इतिभावः एवंसति कटुतिक्ताद्यामवयविनारम्भेसति चित्ररसाद्यस्वीकारस्त्विति प्रमाणाभावादितिभावः
रसोपलम्भश्चावयवरसमादायोपपादनीयः चचरूपेपि इयमुक्तत्वे रूपस्य हेतुत्वेनावयविनिरूपाभावेनतत्प्रत्यक्षानुपपत्तेः नचपरंपरया
रूपस्य प्रत्यक्षत्वे तत्त्वमङ्गीकरणीयं गौरवात् अतिप्रसङ्गाच्च नीलपीतद्व्यणुकारब्धत्रसरेणुरूपस्य प्रत्यक्षानुपपत्तिः इदंतु चित्रं
मधुराम्ललवणकटुत्रसरेणुभिरारब्धेत्र तुरणुके रसप्रत्यक्षानुपपत्तिः त्रसरेणोः रूपविहायान्येषामप्रत्यक्षत्वात् अवयविरसानुत्पा
दात् चित्ररसादेरस्वीकारात् द्वित्वादयोऽपेक्षाबुद्धिजन्याः इति अपेक्षाबुद्धिः नानैकत्वावगाहिनी बुद्धिः परिमाणविशेषकारण
विशेषमाह स्वावयवेति बहुत्वं चेति चकारात्कारणगुणसंग्रहः अवयवानां शिथिलसंयोगः प्रचयोपि तज्जनकः इति संयोगान्तेऽ

द्रव्यानारंभकसंयोगविरोधिविभागाजनकं द्रव्यारंभकसंयोगविरोधिविभागजनकत्वादिति व्यतिरेक्यनुमाने चवैजात्यमनुपाधिरि
तिरहस्यं नचसंयोगेपीति एवंकारणमात्रसंयोगजत्वं कारणाकारणसंयोगजत्वंतत्राक्रियैवकारणयोःसंयोगजनने विरोधात्
विरोधाभावात् तद्वतितत्प्रकारकमिति विशेष्यत्वसम्बन्धेत्यर्थः तस्यचनिरूपितत्वसंसर्गेण तत्प्रकारत्वेचयः तद्विशेष्यता
निरूपिततन्निष्ठप्रकारतानिरूपकत्वं ज्ञानेबाधकतिनिष्कर्षयथार्थत्वं एवमनुभवइति एवंपदेनान्यत्वज्ञानयोः कार्यकारण
भावेवच्छेदकैक्यस्य तत्रत्वेपि प्रकृतेजातमात्रस्यस्तनपाने प्रवृत्तिदर्शनेनेष्टसाधनतास्मरणस्यावश्यकत्वेन प्राग्भवीयानुभ
वादेवजीवनादृष्टरूपोद्बोधकसहकृतसंस्कारात्तस्य वाच्यतयानुभावावच्छेदकस्य सवच्छेदकैकशरीरयोर्भेदस्यावश्यकत्वेननाव
च्छेदकैक्यस्यतंत्रत्वमितिसूच्यते चरमस्मृतिनिष्ठवैजात्यमेवसंस्कारमात्रफलतावच्छेदकं तेनानुभवजन्यसंस्कारस्य [illegible] यमादिस्मर
णेनानाशात् नोत्तरोत्तरस्मरणानुपपत्तिरितिसूचयितुं ज्ञानत्वस्यव्यापकधर्मत्वया ऽन्यथासिद्धिनिरूपकत्वम् चेत्यभिप्रे
त्याह अनुभव इति समानःकोटिद्वयसहचरितः विशेषादर्शनं संशयधर्मितावच्छेदकेनकोटिद्वयान्यतरस्यतद्व्याप्यस्यतदवच्छे
दकस्यतदसमानाधिकरणस्यवानिश्चयः विशेषादर्शनेनेति यदिंद्रियजन्योभ्रमःस्तदिंद्रियजन्यविशेषदर्शनस्याभावः शंखःश्वेतः इ
त्याद्यानुमानिकादिविशेषदर्शनसत्वेपि नभ्रमानुपपत्तिः अन्यस्यान्यथेति ज्ञानलक्षणप्रत्यासत्तेरनभ्युपगमादिति भावः ननु

त.त.
८

इतितर्कामृततरंगिणी समाप्ता १३८

ॐ श्रमश्रमश्रयश्रीबदरीकाश्रमत
श्रीनारायणकृष्णस्मरुडु

Acc 137

प. ८

१